नगजः, पुं, (नगे पर्व्वते जायते इति । जन+डः ।) हस्ती । इत्यमरटीकायां सारसुन्दरी ॥ पर्व्वतजातवस्तुमात्रे, त्रि ॥

नगजा, स्त्री, (नगे जायते या । जन+डः । टाप् ।) क्षुद्रपाषाणभेदा । इति राजनिर्घण्टः ॥

नगणा, स्त्री, (नास्ति गणो यस्याः ।) लताविशेषः । नयाफट्की इति भाषा । तत्पर्य्यायः । पारावतपदी २ पिण्या ३ स्फुटबन्धनी ४ ज्योतिष्मती ५ पूतितैला ६ इङ्गुदी ७ । इति रत्नमाला ॥

नगनन्दिनी, स्त्री, (नगस्य हिमालयस्य नन्दिनी । दुर्गा । इति शब्दरत्नावली ॥

नगपतिः, पुं, (नगानां पतिः ।) हिमालयपर्व्वतः । इति त्रिकाण्डशेषः ॥ (नगानां ओषधीनां पतिः ।) चन्द्रः ॥

नगभित्, पुं, (नगं भिनत्तीति । भिद्+क्विप् ।) पाषाणभेदनः । इति राजनिर्घण्टः ॥ टङ्कश्च ॥

नगभूः, पुं, (नगे भूरुत्पत्तिर्यस्य ।) क्षुद्रपाषाणभेदा । इति राजनिर्घण्टः ॥ पर्व्वतजाते, त्रि ॥

नगरं, क्ली, नगा इव प्रासादादयः सन्ति यत्र । ("नगपांसुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य वार्त्तिकोक्त्या रः ।) बहुलोकवासस्थानम् । शहर इति भाषा । तत्पर्य्यायः । पूः २ पुरी ३ पुरिः ४ पुरम् ५ नगरी ६ पत्तनम् ७ पट्टनम् ८ पट्टनी ९ पुटभेदनम् १० पटभेदनम् ११ स्थानीयम् १२ निगमः १३ इत्यमरभरतौ । कटकम् १४ पट्टम् १५ । इति शब्दरत्नावली । केचित्तु नगरपत्तनस्थानीयानां भेदमाहुः । तत्र पुरादित्रयं पुरे । पत्तनादिद्वयं पत्तने । स्थानीयादिद्वयं स्थानीये । इति मन्यन्ते । यत्राष्टशतग्रामीयव्यवहारस्थानं मध्यवर्त्ति तत् नगरम् । यत्र राजा तत्परिचारकाश्च तिष्ठन्ति तत् पत्तनम् । प्राकारादिना दुर्गं योजनविस्तीर्णं नगरं स्थानीयम् । केचित्तु पुरनगरयोरपि भेदमाहुः । बहुग्रामीयव्यवहारस्थानं पुरम् । तत्र प्रधानभूतं नगरम् । इति भरतः ॥ * ॥

अथ नगरनिर्म्माणकालः ।

"स्थिरराशिगते भानौ चन्द्रे च स्थिरभोदये ।
शुद्धे काले दिने चैव नगरं कारयेन्नृपः ॥" * ॥

तस्य लक्षणं भविष्योत्तरे ।

"दीर्घं वा चतुरस्रं वा नगरं कारयेन्नृपः ।
तत्त्र्यस्रं वर्त्तुलं वापि कदाचिदपि कारयेत् ॥
दीर्घं पादैकमधिकं चतुरस्रं समोचितम् ।
त्रिभिः पादैः समं त्र्यस्रं वर्त्तुलं वलयाकृति ॥
दीर्घं स्याद्दीर्घकालाय सुखसम्पत्तिहेतवे ।
चतुरस्रं चतुर्वर्गफलाय पृथिवीभुजः ॥
त्र्यस्रं त्रिशक्तिनाशाय वर्त्तुलं बहुरोगकृत् ।
राज्ञः स्वहस्तैर्दशभी राजहस्त उदाहृतः ॥
राजहस्तैश्च दशभी राजदण्ड उदाहृतः ।
राजदण्डैश्च दशभी राजक्षेत्रमुदाहृतम् ॥
राजक्षेत्रैश्च दशभी राजकाण्ड उदाहृतः ।
राजकाण्डैश्च दशभी राजपुरुष उच्यते ॥
राजग्रामी तु कथिता दशभी राजपुरुषैः ।
राजधानी दशगुणा राजधेनुमुदाहृतम् ।
अष्टैव परिमाणानि प्रोक्तानि पुरपत्तने ।
भयत्राणभोगसम्पत्तिमर्य्यादकीर्त्तिसुखार्थिनाम् ।
राजधेन्वेव नृपतिः पुरपत्तनमारभेत् ॥
अस्मीरीय: क्षमा सौख्यं पचत्वं भङ्ग एकता ।
यन्त्रहितत्वं नाशश्च मङ्गलश्च बलं व्ययः ।
साम्राज्यं भोगसम्पत्तिरिति षोडश कीर्त्तिताः ॥
यथार्थसंज्ञा नगरा मुनिना तत्त्ववेदिना ॥"

इति युक्तिकल्पतरुः ॥ * ॥

अपि च ।

"नृपावासः पुरी प्रोक्ता विप्राद्युरमपीष्यते ।
एकतो यत्र तु ग्रामो नगरञ्चैकतः स्थितम् ॥
मिश्रन्तु खर्व्वटं नाम नदीगिरिसमाश्रयम् ।
विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति हि ॥
स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च ।
पण्यक्रियादिनिपुणैश्चातुर्व्वर्ण्यजनैर्युतम् ॥
अनेकजातिसम्बन्धं नैकशिल्पिसमाकुलम् ।
सर्व्वदैवतसम्बन्धं नगरन्त्वभिधीयते ॥"

इति विष्णुपुराणटीकायां श्रीधरस्वामिधृतभृगुवचनम् ॥ * ॥

अन्यच्च ।

"नगरं सर्व्वतोभद्रं कर्णयं रोधकं हि वा ।
स्वस्तिकं मध्यगं कार्य्यं कुमारीपुरमेव वा ॥
चतुष्पथचतुर्युक्तं सर्व्वकामसुखावहम् ।
छिन्नकर्णं विनाशश्च दुःस्थितं लक्ष्मदुर्ब्बलम् ॥
नगरं न प्रशंसन्ति गर्भविद्धं विभेदितम् ।
अग्रतः स्वल्पप्रासादं छिन्नभावं विदुर्बुधाः ॥
त्रिमुखं कार्य्यहीनन्तु लक्ष्ममध्यं लक्ष्यं विदुः ।
दुःस्थितं निम्नयाम्यन्तु नैरृतं धनदुर्ब्बलम् ॥
सौम्यं सर्व्वसुखागारादपूरितं वायवं वशम् ।
याम्यमायुःप्रदं पूर्ब्बनगरं प्रीतिवर्द्धनम् ॥
ईशवासवसंपूर्णं सर्व्वारोग्यसुखप्रदम् ।
मध्यचतुष्पथोपेतं न च तं पीडयेत् क्वचित् ॥
ब्रह्मस्थानं हि तं विप्र शिवस्तत्र सदा स्थितः ।
चतुर्व्विंशतिनाथस्तु हस्तान्यष्टशतं परम् ॥
अत्र मध्यं प्रशंसन्ति कृष्णोत्कृष्टविवर्ज्जितम् ।
अथ किष्कुशतान्यष्टौ प्राङ्मुखं निवेशनम् ॥
नगरार्द्धेन विष्कम्भं खेटं ग्रामं ततोऽर्द्धतः ।
नगराद्योजनं खेटं खेटाद्ग्रामोऽर्द्धयोजनः ॥
द्विक्रोशं परमा सीमा क्षेत्रसीमा चतुर्द्धनुः ।
विंशद्धनूंषि विस्तीर्णो देशो मार्गस्तु तैः कृतः ॥
विंशद्धनुर्ग्राममार्गः सीमामार्गो दशैव तु ।
धनूंषि दश विस्तीर्णः श्रीमान्राजपथः कृतः ॥
नृवाजिरथनागानामसम्बाधः सुसञ्चरः ।
धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिताः ॥
त्रिकराश्चोपरथ्यास्तु द्विकराप्युपरथ्यिका ।
जङ्घापथश्चतुष्पादस्त्रिपादस्य गृहान्तरम् ॥
वृतीपादस्त्वर्द्धपादः प्राग्वंशपादकः स्मृतः ॥"

इति देवीपुराणम् ॥

नगरकीर्त्तनं, पुं, (नगरे कीर्त्तनं नगरपरिभ्रमणेन हरिनामसंघोषणम् ।) नगरादिभ्रमणकरणकहरिसङ्कीर्त्तनम् । यथा,—

"नाचारो नाधिकारो च न स्थाननियमस्तथा ।
ग्रामे वा नगरे साधुर्व्वने वा कीर्त्तयेद्धरिम् ॥"

इति हरिनाममाहात्म्यम् ॥

नगरघातः, पुं, (नगरं हन्तीति । हन+अण् ।) हस्ती । इति संक्षिप्तसारव्याकरणम् ॥

नगरी, स्त्री क्ली, (नगर+ङीष् ।) नगरम् । इत्यमरः । २ । १ । १ ॥ (यथा, महाभारते । १२ । ५ । ६ ।

"प्रीत्या ददौ स कर्णाय मालिनीं नगरीमथ ।
अङ्गेषु नरशार्द्दूल ! स राजासीत् सपत्नजित् ॥")

नगरीवकः, पुं, (नगर्य्यां वक इव ।) काकः । इति त्रिकाण्डशेषः ॥

नगरोत्था, स्त्री, (नगरादुत्तिष्ठतीति । उत्+स्था+कः । टाप् ।) नगरमुस्ता । इति राजनिर्घण्टः ॥

नगरौषधिः, स्त्री, (नगरजाता ओषधिः फलपाकान्तत्वात् ।) कदली । इति शब्दचन्द्रिका ॥

नगाटनः, पुं, (नगे वृक्षे अटति भ्रमतीति । अट+ल्युः ।) वानरः । इति त्रिकाण्डशेषः ॥ (पर्व्वतचारिणि, त्रि ॥)

नगाधिपः, पुं, (नगानां पर्व्वतानामधिपः ।) हिमालयपर्व्वतः । इति जटाधरः ॥

नगाश्रयः, पुं, (नगः पर्व्वतः आश्रय उत्पत्तिस्थानं यस्य ।) हस्तिकन्दः । इति राजनिर्घण्टः ॥ नगवासिनि, त्रि ॥

नगौकाः, [स्] पुं, (नगो वृक्षः पर्व्वतो वा ओक आश्रयस्थानं यस्य ।) पक्षी । इत्यमरः । २ । ५ । ३३ ॥ सरभः । सिंहः । इति मेदिनी । से, ५६ ॥ काकः । इति शब्दचन्द्रिका ॥ नगरवासिनि, त्रि ॥

नग्नः, त्रि, (नजते स्मेति । ओ नज व्रीडे+अकर्म्मकत्वात् कर्त्तरि क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः ।) विवस्त्रः । नेंटो इति भाषा ॥ तत्पर्य्यायः । अवासाः २ दिगम्बरः ३ । इत्यमरः । ३ । १ । ३९ ॥ तथा च भृगुः ।

"विकच्छोऽनुत्तरीयश्च नग्नश्चावस्त्र एव वा ।
श्रौतं स्मार्त्तं तथा कर्म्म न नग्नश्चिन्तयेदपि ॥
विकचः परिधानाग्रंहृतकच्छः । तथा च योगियाज्ञवल्क्यः ।
"परिधानाद्बहिःकच्छा निबद्धा ह्यासुरी भवेत् ॥"

स्मृतिः ।

"वामे पृष्ठे तथा नाभौ कच्छत्रयमुदाहृतम् ।
एभिः कच्छैः परीधत्ते यो विप्रः स शुचिःस्मृतः ॥"

बौधायनः ।

"नाभौ धृतश्च यद्वस्त्रमाच्छादयति जानुनी ।
अन्तरीयं प्रशस्तं तदाच्छन्नमुभयोस्तयोः ॥"

आचारचन्द्रिकायाम् ।

"द्विकच्छः कच्छशेषश्च मुक्तकच्छस्तथैव च ।
एकवासा अवासाश्च नग्नः पञ्चविधः स्मृतः ॥"

इत्याह्निकतत्त्वम् ॥

"न नग्नां स्त्रियमीक्षेत पुरुषं वा कदाचन ।
न च मूत्रं पुरीषं वा न वै संस्पृष्टमैथुनम् ।